National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 102-104
© 2025 NJHSR
www.sanskritarticle.com

गुंजन जैन
पीएच.डी. शोधार्थी,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नई दिल्ली

Correspondence:
गुंजन जैन
पीएच.डी. शोधार्थी,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नई दिल्ली

# जैनदर्शने मोक्षस्वरूपविमर्श:

**गुंजन जैन**

नानाप्रपञ्चनिष्ठं नामरूपान्वितं व्यवहारपरमजस्रं सृष्टिस्थितिलयै: चक्रपङ्क्तिवदिदं जगत्परमात्मन: एव लीलाविस्तृति:। तत्र भारताख्योऽसौ पुण्यमयः देश: सर्वविद्याप्रभू: इत्युपनिषद्वाणी। नैकजन्ममरणप्रपञ्चे संचरणपरा: लोका: तत्तत्जन्मनि तत्तत्कर्मानुगुणेषु योनिविशेषेषु जातिगुणकर्मादिविभागानुगुणं व्रजन्त: दु:खनिवारणाय प्रयत्नतः दृश्यन्ते। अत्र खलु त्रिविधदुःखानाम् आत्यन्तिकनिवृत्तयेऽथ च प्रमेयं प्रमातुं प्रवर्तितं दर्शनम् इति मनीषिणां विश्वास: चापि सर्वजनीनप्रसिद्धम्। तावत् क: दर्शनशब्दार्थः इति विजिज्ञास्यते विद्यावैविध्येषु दर्शनविद्याया: महत्त्वं स्वरूपञ्च यतः शास्त्रेषु शब्दितं तत्राप्यनुभववेद्यम् इति मन्यामहे। तस्मादेव दर्शनं समुद्भूतम्। तत्र यदि सङ्कीर्णेऽर्थे विचारवीथिका गच्छति तर्हि चाक्षुषेन्द्रियेण प्रत्यक्षेण तदीयकर्णे इन्द्रिये वा दर्शनशब्दार्थः अधियाति। शब्दशास्त्रपक्षे दृश् धातो: ल्युट् प्रत्ययसंयुक्त: दर्शनशब्द: एकाधिकार्थबोधक: इति शास्त्रवचनम्।

तदेव –

**निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्।**[1]

तत्र शास्त्रविशेषे प्रयुक्त: दर्शनशब्द: स्वकीयं वैशिष्ट्यं निजभेदप्रभेदै: संस्थापनां चक्रे। तत्र दर्शनानि तावदस्मद्देशे सञ्जातानां तपोनिष्ठानां महर्षिणां कोटिभ्य: वर्षेभ्य: साधना-चिन्तन-श्रवण-मनन-निदिध्यासन-विचारेभ्यश्च सञ्जातानि शाश्वतस्रोतांसि वर्तन्ते यैरन्वितेयं भारतीयसंस्कृति: चिरन्तनापि नूतनामिव प्रतिभाति। वैदिकावैदिकभेदाभ्यां लोकाख्यातानि दर्शनानि तथ्यवैविध्येन आत्मविचाराः प्रकटयन्ति प्रसारयन्ति च। तानि च दर्शनानि षडिति पुरातनप्रख्यातिः। तत्रेत्थं साम्प्रतकालं यावत् शास्त्रेषु विकत्थितं यत् दर्शनभेदस्तु वैदिकावैदिकाभ्याम् इमे वैदिक-दर्शनभेदा: - सांख्य-योगन्याय-वैशेषिक-मीमांसा-वेदान्ता:।अवैदिकाश्च चार्वाकजैनबौद्धा:। इह भारतीयवाङ्मयस्य आकाशे स्वप्रभाप्रसारतत्परं जैनदर्शनं ध्रुवनक्षत्रमिव सन्तिष्ठते। अर्हत्- निर्ग्रन्थ-अहिंसा-अनेकान्तादि तत्वै: परिपूर्णं दर्शनमिदं मोक्षधारणां कर्माधारम् आसाद्य सिद्ध्यति। तदेव जिनव्युत्पत्तिविचारे पञ्चास्तिकाय-समयव्याख्यायां आचार्यामृतचन्द्र: जगाद -

**अनेकभवगहनविषयव्यसनप्रापणहेतून् कर्मारातीन् जयतीति जिन:।**[2]

अत्रेह दर्शने मोक्षतत्त्वं प्रमेयत्वेन अकथयत। वस्तुत: वक्तृदृशा प्रमेयोऽयं चतुर्धा प्रविभज्यते – द्रव्यक्षेत्रकालभावश्च। एनं भावमेवादृत्य सप्ततत्त्वानि निश्चितानि।तानि च तत्त्वानि –

**जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षस्तत्त्वानि।**[3]

यदि हीमानि तत्त्वानि दर्शनस्य ज्ञानस्य आचरणस्य च सम्यक्तां प्रभजन्ते, तदेव दर्शनस्यास्यानुगुणं मोक्ष: विलङ्घ्यात् तर्हि मोक्षतत्त्वप्रसारात् प्राक् शङ्काप्रस्तर: प्रसरति यत् क: मोक्ष:? तत्र कैवल्यम्, नि:श्रेयसम्, अपवर्ग:, इत्यादय:।[4] तत्साधनं किम्? अत एव मोक्षतत्त्वविचारे कोशवचनं यत्

**मोक्षोऽपवर्ग:।**[5]

इतोऽपि रामानुजाचार्यवचनम् –

**मोक्ष: आत्मस्वरूपदर्शनम्।**[6]

दर्शनस्यास्य आचार्यपरम्परायाम् आचार्येण उमास्वमिना मोक्षलक्षणं शब्दयता आह – **बन्धहेत्वाभावनिर्जराभ्यां कृत्स्नकर्म-विप्रमोक्षो मोक्ष:।**[7]

वस्तुत: मोक्षस्यायं विचार: सारत्वेन प्रमाणयति यत् सर्वेषामपि बन्धकारणानां विरहे सत्यथ च सञ्चितकर्माणि यदा निर्जरत्वं यान्ति। तदेव हि जीवस्य निखिलकर्मणां यदात्यन्तिको वियोग: सोऽस्तु मोक्ष:। तस्मात् तत्त्वार्थराजवार्त्तिकग्रन्थात् कथनमिदं विचारयेत् –

**मोक्ष इव मोक्ष:। क: उपमार्थः। यथा – निगडादिद्रव्यमोक्षो सति स्वातन्त्र्ये अभिप्रेतगमनादे: पुमान् सुखी भवति तथा कृत्स्नकर्मवियोगे सति स्वाधीनात्यन्तिकज्ञानदर्शनानुपमसुखम् आत्माऽनुभवति।**[8]

लोकव्यवहारे विषयसुखं भोक्तुं प्रवृत्ति-श्रम-पराश्रय-परिस्थिति-देश-कालादय: अपेक्षिता: भवन्ति। अत एव एतेषां सम्पूर्ति: भवत्वेव नेदम् आवश्यकम्। तात्राभीष्टमस्ति मोक्षाय विषयादीनाम् असङ्गत्वस्य अपि च तत्सुखजप्रलोभनस्य च त्यागं नितान्तमावश्यकम्। विषयासङ्ग: तपः तपस: परिणामश्च मुक्ति:। तदेव पूज्यपाद देवनन्दिन: वचनमिदं यत्-

**निरवशेष-निराकृत-कर्ममल-कलङ्कस्य-अशरीरस्य-आत्मन: अचिन्त्य-स्वाभाविक-ज्ञानादिगुणमव्या-बाधासुखमात्यन्तिकम् अवस्थानन्तरं मोक्ष: इति।**

इन्द्रियविषयसन्निकर्षेण सञ्जातसुखस्य परित्यागात् शरीरस्य तत्सम्बद्धसङ्गठनोपकरण-भोग्यसामग्रीणां दासता नश्यति। दासत्वं च विनष्टे सति संसाररागोपि नश्यतां याति। येनालौकिकानन्द: अनुभूयते एवं सक्रमं सञ्जाते कर्मव्युत्सर्गो अचिरमेव सम्भवति। व्युत्सर्गो नाम दासबन्धनस्य परतन्त्रबन्धनस्य च विनाश: एव अस्य परिणामे ईश्वरत्वस्य स्वाधीनताया: मुक्तेश्च अनुभूति: सिद्ध्यति। इयमनुभूति: एव सर्वधर्मेषु निर्वाण-सिद्ध-मुक्ताभिधानवैविध्यै: विस्तीर्यते। जैनदर्शनाचार्य: हरिभद्रसूरिरपि षड्दर्शनसमुच्चये आह –

**बद्धस्य कर्मण: साटो सा यस्तु सा निर्जरा गता।**
**आत्यन्तिको वियोगस्तु देहादेर्मोक्ष उच्यते।।**

पद्यस्यास्य व्याख्या कुर्वता श्रीगुणरत्नसूरिणा पद्यवदेव स्वभावा: वाक्येषु विन्यस्ता:।[9] सर्वेभ्य: दु:खेभ्य: शाश्वताय सर्वथा मुक्ति: अविनाशिन: परमानन्दस्य अनुभवकार्यमेव इदं तदेव सम्भवं स्यात् यदा दु:खानां कारणस्वरूपानां दोषपापादीनां त्यागं प्रकार्य पूर्णतया निर्दोष: भूत्वा लोकस्य कर्माणि क्षीणतां यान्ति तेन आत्मन: बन्धस्य च पृथग्पृथगवस्था दृश्यते मोक्षश्च प्राप्यते। तस्मात् वचनानि यत् –

**आत्मबन्धयोर्द्विधाकरणं मोक्ष:।**

यद्यपि बहुत्र जैनशास्त्रेषु अस्य मोक्षस्य स्वरूपं विस्तरेण विवृतम्।तथापि अभिप्रायस्तु सर्वत्र एकमेव यत् अयं प्राणवान् जीव: कर्मबन्धनबद्धः अतः एतै: कर्मबन्धनै: आत्यन्तिकी निवृत्तिरेव मोक्षः इति, निवृत्त्यवस्थायां मोक्षे तस्य स्वस्वरूपे अवस्थानं जायते। तत्र तर्करहस्यदीपिकायां श्रीगुणरत्नसूरिमहोदय: एवमभिप्रायमिदमभि-प्रैति –

**यो हि शश्वद् भवति न पुनः कदाचिन्न भवति स आत्यन्तिक:**[10]

एवं स्वरूपितमोक्षस्य भेदविचारे बहुत्र ग्रन्थेषु एकविधत्वमेव प्रतिपादितम्[11]। किन्तु द्रव्यभावभेदेन तस्य आत्यन्तिकस्थिते: द्वैविध्यमपि निगदितं कुत्रचित् यथा –

**तं मुक्कं अविरुद्धं दुविहं खलुदव्वभावगदं**[12]

जैनशास्त्रेषु प्रतिपादितानां पुद्गलकर्मणामात्यन्तिकवियोग: एव द्रव्यमोक्षनाम्ना प्रतिपादितम्। तथा च भावमोक्षे तु रागद्वेषमोहादीनां सर्वेषामशुभभावानां आत्यन्तिक: वियोग: चित्रित:। प्रथितयशस्का: जयसेनाचार्या: एवं वदन्ति यत् –

“कर्मनिर्मूलनसमर्थः शुद्धात्मोपलब्धिरूपजीवपरिणामो भावमोक्ष:, भावमोक्षनिमित्तेन जीवकर्मप्रदेशानां निरवशेष: पृथग्भावो द्रव्यमोक्षः” इति।

दर्शनेऽस्मिन् अवधेयमिदं यत् मोक्षावस्थायां जीवस्य अशुद्धभावानामभाव: जायते न तु जीवस्य अभाव:। अतः अत्र दर्शने मोक्षस्वरूपम् अभावात्मकं विद्यते, उक्तञ्च सिद्धिविनिश्चयग्रन्थे आचार्याकलङ्कदेवाचार्येण –

**आत्मलाभं विदुर्मोक्षं जीवस्यान्तर्मलक्षयात्।**

**नाभावं नाप्यचैतन्यं न चैतन्यमनर्थकम्।।**[13]

**पादटिप्पणी -**

[1]अमरकोश:

[2]आचार्यामृतचन्द्र:, पञ्चास्तिकायसमयव्याख्या।

[3]आचार्योमास्वामी, तत्त्वार्थसूत्रम्, अध्याय:-१, सू-४।

[4]अमरकोश:

[5]अमरकोश:

[6]शब्दकल्पद्रुम:

[7]तत्वार्थसूत्रस्य दशमाध्याये सूत्राङ्क-२

[8]तत्त्वार्थराजवार्त्तिके,प्रथमाध्याये सूत्राङ्क: - ४

[9]देहादे: शरीरपञ्चेन्द्रिय-आयुरादि-बाह्यप्राण-पुण्यापुण्य-वर्णगन्धरसस्पर्शपुनर्जन्मग्रहण-वेदत्रयकषायादिसङ्ग-अज्ञान असिद्धत्वादेरात्यन्तिको वियोगो विरहो मोक्ष इष्यते।

[10] तर्करहस्यदीपिका टीका चतुर्थाधिकार: कारिका – ५२ अनुच्छेद: - २३७

[11] तत्त्वार्थराजवार्त्तिके १-७

[12] बृहन्नयचक्रं गाथा - १५९

[13] सिद्धिविनिश्चय: - ७